पावकप्रेरितः सोऽथ क्रमादूर्द्धपथे चरन्।
अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः॥
पुष्टं शीर्षे त्वपुष्टञ्च कृत्रिमं वदने तथा।
आविर्भावयतीत्येवं पञ्चधा कीर्त्त्यते बुधैः॥"
"नकारं प्राणनामानं दकारमनलं विदुः।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते॥"
अयन्तु योगिसंवेद्य एव। अस्य अवस्थादिकं यदुक्तं हठयोगप्रदीपिकायाम्। ४। ६५-१०७।
"अशक्यतत्त्वबोधानां मूढ़ानामपि संमतम्।
प्रोक्तं गोरक्षनाथेन नादोपासनमुच्यते॥

श्रीआदिनाथेन सपादकोटि-
लयप्रकाराः कथिता जयन्ति।
नादानुसन्धानकमेकमेव
मन्यामहे मुख्यतमं लयानाम्॥

मुक्तासने स्थितो योगी मुद्रां सन्धाय शाम्भवीम्।
शृणुयाद्दक्षिणे कर्णे नादमन्तःस्थमेकधीः॥
श्रवणपुटनयनयुगलघ्राणमुखानां निरोधनं कार्य्यम्।
शुद्धसुषुम्नासरणौ स्फुटममलः श्रूयते नादः॥
आरम्भश्च घटश्चैव तथा परिचयोऽपि च॥
निष्पत्तिः सर्व्वयोगेषु स्यादवस्थाचतुष्टयम्।

अथारम्भावस्था।

ब्रह्मग्रन्थेर्भवेद्भेदो ह्यानन्दः शून्यसम्भवः।
विचित्रः क्वणको देहेऽनाहतः श्रूयते ध्वनिः॥
दिव्यदेहश्च तेजस्वी दिव्यगन्धस्त्वरोगवान्।
संपूर्णहृदयः शून्य आरम्भो योगवान् भवेत्॥

अथ घटावस्था।

द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः।
दृढ़ासनो भवेद्योगी ज्ञानी देवसमस्तदा॥
विष्णुग्रन्थेस्ततो भेदात् परमानन्दसूचकः।
अतिशून्ये विमर्दश्च भेरीशब्दस्तथा भवेत्॥
तृतीयायां तु विज्ञेयो विहायोमर्दलध्वनिः।
महाशून्यं तदा याति सर्व्वसिद्धिसमाश्रयम्॥
चित्तानन्दं तदा जित्वा सहजानन्दसम्भवः।
दोषदुःखजराव्याधिक्षुधानिद्राविवर्ज्जितः॥
रुद्रग्रन्थिं यदा भित्वा शर्व्वपीठगतोऽनिलः।
निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणो भवेत्॥
एकीभूतं तदा चित्तं राजयोगाभिधानकम्।
सृष्टिसंहारकर्त्तासौ योगीश्वरसमो भवेत्॥
अस्तु वा मास्तु वा मुक्तिरत्रैवाखण्डितं सुखम्।
लयोद्भवमिदं सौख्यं राजयोगादवाप्यते॥
राजयोगमजानन्तः केवलं हठकर्म्मिणः।
एतानभ्यासिनो मन्ये प्रयासफलवर्ज्जितान्॥
उन्मन्यवाप्तये शीघ्रं भ्रूध्यानं मम संमतम्।
राजयोगपदं प्राप्तं सुखोपायोऽल्पचेतसाम्॥
सद्यः प्रत्ययसन्धायी जायते नादजो लयः॥

नादानुसन्धानसमाधिभाजां
योगीश्वराणां हृदि वर्द्धमानम्।
आनन्दमेकं वचसामगम्यं
जानाति तं श्रीगुरुनाथ एकः॥

कर्णौ पिधाय हस्ताभ्यां यं शृणोति ध्वनिं मुनिः।
तत्र चित्तं स्थिरीकुर्य्याद्यावत्स्थिरपदं व्रजेत्॥
अभ्यस्यमानो नादोऽयं बाह्यमावृणुते ध्वनिम्।
पक्षाद्विक्षेपमखिलं जित्वा योगी सुखी भवेत्॥
श्रूयते प्रथमाभ्यासे नादो नानाविधो महान्।
ततोऽभ्यासे वर्धमाने श्रूयते सूक्ष्मसूक्ष्मकः॥
आदौ जलधिजीमूतभेरीभर्झरसम्भवाः।
मध्ये मर्द्दलशङ्खोत्था घण्टाकाहलजास्तथा॥
अन्ते तु किङ्किणीवंशवीणाभ्रमरनिःस्वनाः।
इति नानाविधा नादाः श्रूयन्ते देहमध्यगाः॥
महति श्रूयमाणेऽपि मेघभेर्य्यादिके ध्वनौ :
तत्र सूक्ष्मात् सूक्ष्मतरं नादमेव परामृशेत्॥
घनमुत्सृज्य वा सूक्ष्मे सूक्ष्ममुत्सृज्य वा घने।
रममाणमपि क्षिप्तं मनो नान्यत्र चालयेत्॥
यत्र कुत्रापि वा नादे लगति प्रथमं मनः।
तत्रैव सुस्थिरीभूय तेन सार्द्धं विलीयते॥
मकरन्दं पिबन् भृङ्गो गन्धं नापेक्षते यथा।
नादासक्तं तथा चित्तं विषयान्न हि काङ्क्षते॥
मनोमत्तगजेन्द्रस्य विषयोद्यानचारिणः।
नियमने समर्थोऽयं निनादनिशिताङ्कुशः॥
बद्धं तु नादबन्धेन मनः संत्यक्तचापलम्।
प्रयाति सुतरां स्थैर्य्यं छिन्नपक्षः खगो यथा॥
सर्व्वचिन्तां परित्यज्य सावधानेन चेतसा।
नाद एवानुसन्धेयो योगसाम्राज्यमिच्छता॥
नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते।
अन्तरङ्गकुरङ्गस्य वधे व्याधायतेऽपि च॥
अन्तरङ्गस्य यमिनो वाजिनः परिघायते।
नादोपास्तिरतो नित्यमवधार्य्या हि योगिना॥
बद्धं विमुक्तचाञ्चल्यं नादगन्धकजारणात्।
मनः पारदमाप्नोति निरालम्बाख्यखेऽटनम्॥
नादश्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः।
विस्मृत्य सर्व्वमेकाग्रः कुत्रचिन्नहि धावति॥
काष्ठे प्रवर्त्तितो वह्निः काष्ठेन सह शाम्यति।
नादे प्रवर्त्तितं चित्तं नादेन सह लीयते॥
घण्टादिनादसक्तस्तब्धान्तःकरणहरिणस्य।
प्रहरणमपि सुकरं शरसन्धानप्रवीणश्चेत्॥
अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते।
ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः।
मनस्तत्र लयं याति तद्विष्णोः परमं पदम्॥
तावदाकाशसङ्कल्पो यावच्छब्दः प्रवर्त्तते।
निःशब्दं तत्परं ब्रह्म परमात्मेति गीयते॥
यत्किञ्चिन्नादरूपेण श्रूयते शक्तिरेव सा।
यस्तत्त्वान्तो निराकारः स एव परमेश्वरः॥
सर्व्वे हठलयोपाया राजयोगस्य सिद्धये।
राजयोगसमारूढ़ः पुरुषः कालवञ्चकः॥
तत्त्वं बीजं हठः क्षेत्रमौदासीन्यं जलं त्रिभिः।
उन्मनी कल्पलतिका सद्य एव प्रवर्त्तते॥
सदा नादानुसन्धानात् क्षीयन्ते पापसञ्चयाः।
निरञ्जने विलीयेते निश्चितं चित्तमारुतौ॥
शङ्खदुन्दुभिनादञ्च न शृणोति कदाचन।
काष्ठवज्जायते देह उन्मन्यावस्थया ध्रुवम्॥
सर्वावस्थाविनिर्मुक्तः सर्व्वचिन्ताविवर्ज्जितः।
मृतवत्तिष्ठते योगी स मुक्तो नात्र संशयः॥"*॥
स्वनामख्यातमुनिविशेषः। अयन्तु ईश्वरमुनेः पुत्त्रः। न्यायतत्त्वयोगरहस्ययोः प्रणेता। अस्य वासस्थानं दाक्षिणात्यप्रदेशः॥)

नादेयं, क्ली, (नद्या नदस्य वा इदं तत्र भवं वा। नदी वा नद+ढक्।) सैन्धवलवणम्। इति रत्नमाला॥ सौवीराञ्जनम्। इति राजनिर्घण्टः॥ नदीनदसम्बन्धिजलादौ, त्रि। यथा,—
("नादेयं नादेयं शरदि वसन्ते च नादेयम्।
पानीयं पानीयं शरदि वसन्ते च पानीयम्॥"
इति वैद्यकराजवल्लभीयद्रव्यगुणे॥)
"नद्या नदस्य वा नीरं नादेयमिति कीर्त्तितम्॥"
अस्य गुणाः। यथा, भावप्रकाशे।
"नादेयमुदकं रूक्षं वातलं लघु दीपनम्।
अनभिष्यन्दि विशदं कटुकं कफपित्तनुत्॥"
(न आदेयमिति विग्रहे अग्राह्ये, त्रि। यथा,—
"सौगन्ध्यहीनं नादेयं पुष्पं कान्तमपि क्वचित्॥")

नादेयः, पुं, (नद्यां भवः। नदी+ढक्।) काशतृणम्। वानीरवृक्षः। इति राजनिर्घण्टः॥

नादेयी, स्त्री, (नद्यां भवा। "नद्यादिभ्यो ढक्।" ४।२।९७। इति ढक् ततो ङीष्।) अम्बुवेतसः। भूमिजम्बुका। वैजयन्तिका। इत्यमरः। २।४।६५॥ नागरङ्गः। जवा। पञ्चुस्तः। इति मेदिनी। ये, ८६॥ अग्निमन्थः। (अस्याः पर्य्यायो यथा,
"अग्निमन्थो जयः स स्याच्छ्रीपर्णी गणिकारिका।
जया जयन्ती तर्कारी नादेयी वैजयन्तिका॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥) काकजम्बूः। इति राजनिर्घण्टः॥

नाध, ऋ ङ नाथे। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं ऐश्वर्य्ये अकं-सेट्।) ऋ, अननाधत्। ङ, नाधते। नाथो दयाशीरैश्वर्य्यार्थनानि। इति दुर्गादासः॥

नाना, व्य, (न+"विनञ्भ्यां नानाञौ न सह।" ५।२।२७। इति नाञ्प्रत्ययः।) अनेकार्थम्। (यथा, मनुः। ६।१४८।
"बह्वीषु चैकजातानां नानास्त्रीषु निबोधत॥")
उभयार्थम्। विनार्थम्। इति मेदिनी। ने, ४५॥
(यथा, मुग्धबोधे। [वरः॥")
"न नाना शम्भुना रामात् वर्षेणाघोऽच्चजो-

नानाकन्दः, पुं, (नाना बहवो कन्दा यस्य।) पिण्डालुः। इति राजनिर्घण्टः॥ बहुमूलश्च॥ (बहुमूलयुक्ते, त्रि॥)

नानाध्वनिः, पुं, (नाना ध्वनिर्यत्र। नानाविधो ध्वनिर्वा।) काहलावेणुवीणादिशब्दः। इति हारावली। २४६॥

नानारूपः, त्रि, (नाना रूपाणि यस्य।) अनेकप्रकारः। तत्पर्य्याय। विविधः २ बहुविधः ३ पृथग्विधः ४। इत्यमरः। ३।१।९३॥ (यथा, मनुः। ६।३८।
"भूमावप्येककेदारे कालोप्तानि कृषीवलैः।
नानारूपाणि जायन्ते बीजानीह स्वभावतः॥"
नाना रूपाणि इति विग्रहे। बहुविधरूपे, क्ली। यथा, गोः रामायणे। ३।१।२१।
"नानारूपैर्विरूपास्ते रूपैरशुभदर्शनाः॥")